# ॥ श्रीदत्तगोरक्षनाथकवचस्तवराज ॥

श्री गणेशाय नमः ॥ ॐ नमो दत्तगोरक्षनाथाय नमः ॥

श्री पार्वत्युवाच ॥

नमस्ते देवदेवेश विश्वव्यापिमहेश्वर ।

श्रीदत्तगोरक्षकवचं स्तवराजं वद प्रभो ॥१ ॥

श्री ईश्वर उवाच ॥

श्रृणु शैलसुते सत्यसिद्धमार्गमयोदितम् ।

ज्ञानविज्ञानमार्गेण जीवन्मुक्तोभवेन्नरः ॥२ ॥

सर्वज्ञत्वं कायसिद्धं लभते वरमुत्तमम् ।

वाक्सिद्धिं योगसिद्धिं लभते चिंतितार्थकम् ॥३ ॥

न दुष्टेभ्यः प्रदातव्यं न दातव्यं कुलेश्वरी ।

निष्प्रपञ्चाय शिष्याय दद्यात् सविधिपूर्वकम् ॥४ ॥

रहस्यातिरहस्यं च मम वक्त्राद्विनिर्गतम् ।

एकान्ते निर्जले रम्ये सरित्सिंधुतटे नगे ॥५ ॥

बिल्वस्थलालये जत्वा कुलमार्गे शुभस्थले ।

सर्वसिद्धेश्वरोसाक्षात्प्राप्यते नात्र संशयः ॥६ ॥

पार्वत्युवाच ॥

अल्पायासेन देवेश पठेन्नित्यं स लभ्यते ।

दत्तगोरक्षकवचं स्तवराजं मयोदितम् ॥७ ॥

न्यासंध्यानं च संयुक्तो जप पुजा विशेषतः ।

सर्वसिद्धिप्रदोनित्यं मयानुग्रहकारकं ॥८ ॥

श्रीईश्वरउवाच ॥

तव भक्ताय शांताय पठनाच्चिंतितं लभेत् ।

सुरासुरजनाग्रेच न मया कथितं प्रिये ॥९ ॥

ॐ अस्य श्रीदत्तगोरक्षकवचमंन्त्रस्य सदाशिव ऋषिः । अनुष्टुप् छन्दः ।

श्रीदत्तात्रेयगोरक्षपरमात्मादेवता । ॐ बीजं । अनुभव शक्तिः ।

ममश्रीदत्तगोरक्षप्रसादसिध्यर्थे जपे विनियोगः ॥१० ॥

अथ करन्यासः ॥

ॐ द्राँ घ्राँ अंगुष्टाभ्यांनमः ॥

ॐ तँ रँ तर्जनीभ्यांनमः ॥

ॐ त्रँ क्षँ मध्यमाभ्यांनमः

ॐ अँ नँ अनामिकाभ्यांनमः ॥

ॐ बँ थँ कनिष्ठिकाभ्यांनमः ॥

ॐ द्राँ यिँ करतलकरपृष्ठाभ्यानमः ॥११ ॥

अथ हृदयादिन्यासः ॥

ॐ द्राँ घ्राँ हुँ हृदयायनमः ॥

ॐ तँ रँ शिरसे स्वाहा ॥

ॐ त्रँ क्षँ शिखायै वषट् ॥

ॐ अँ नँ कवचाय हुँ ॥

ॐ बँ थँ नेत्रत्रयाय वौषट् ॥

ॐ द्राँ यि अस्त्राय फट् ॥

सर्वरक्षणार्थे सर्वसिध्यर्थे जपे विनियोगः ॥१२ ॥

अथ गायत्री ॥

ॐ आदिरूपायविद्महे । ॐ अनादिरूपाय धीमहि ।

तन्नोदत्तगोरक्षप्रचोदयात् ॥१३ ॥

अथ मन्त्रः ॥

ॐॐॐ दँ वँ तँ दत्ताय नमः । ॐॐॐ गोरक्ष सिद्धाय नमः ॥

इति जपित्वा शतत्रयम् ॥१४ ॥

अथ ध्यानम् ॥

दिगंबरं त्रिगुणात्मकं नारायणं निरंजनं योगेश्वरं ।

ॐ अनादिनाथं सर्वव्यापियोगिं हंसकलेश्वरं ॥

चिन्मयं ज्योतिरूपं निराधारं सोहं ब्रह्मसनातनं ।

घोररूपं महाघोरं अष्टांगयोगसिद्धिसिद्धेश्वरम् ॥१५ ॥

ॐ नमो भगवते दत्तात्रेयाय विष्णवे

गुरुपरमात्मने वासुदेवाय नमोऽस्तुते ।

ॐ नमो गोरक्षनाथाय रुद्राय त्रैलोक्याधिपतये

जितेन्द्रियाय सनातनाय नमोऽस्तुते ॥१६ ॥

शिखायां पातु गोरक्षं ब्रह्मरन्ध्रेच दत्तकं ।

भाले गोरक्षनाथश्च दत्तात्रेयो भुवस्थले ॥१७ ॥

चक्षुभ्यां घोर योगीन्द्र गर्भयोगीन्द्र कर्णकौ ।

पाहि मां दत्तगोरक्ष वामदक्षिणनासिकाम् ॥१८ ॥

मुखे गोरक्षनाथं दत्ताचैवधरोष्टके ।

जिह्वाया पातु गोरक्षं दत्तान्पायचिबुत्रकम् ॥१९ ॥

अनुसूरूपासुतं कण्ठे गोरक्ष कण्ठपृष्टके ।

वामदक्षिणहस्तेच दत्तगोरक्ष पाहि माम् ॥२० ॥

सत्सेना हृदये पातु दत्तगोरक्षदैवतम्।

कट्या नाभिं च मां पातु दत्तगोरक्ष योगिनाम्॥२१॥

उरौजंघादिलिंगातं पातु गोरक्षदत्तकं।

पादौपादतलंत्वंच दत्तगोरक्ष पाहि माम्॥२२॥

मस्तकापादपर्यन्तं आपादतलमस्तकम्।

दत्तात्रेयं च गोरक्षं पातु मां सर्वतस्तुनः॥२३

दिशाष्टौच तथाकाशं पाताले विदिशाष्टके।

दिवारात्रौ त्रिवेलायां दत्तगोरक्ष पाहि माम्॥२४॥

जलाग्नि घोरयुद्धे च शस्त्रघाते विषत्तके।

रक्ष रक्ष सदा देव दत्तगोरक्षदैवतम्॥२५॥

मन्त्रादियन्त्रतन्त्राणां कल्पकोटिन्यकृत्तिमम्।

रक्ष रक्ष सदा देव दत्तगोरक्षदैवतम्॥२६॥

अग्निपार्थैचौरसर्पैव्याघ्रदुष्टभयेवने।

रक्ष रक्ष सदा देव दत्तगोरक्षदैवतम्॥२७॥

भूतप्रेतपिशाचोग्रकुष्मांडाभैरवादयः।

डाकिणीशाकिनीकृत्वापादगोरक्षदत्तकम्॥२८॥

स्वर्गपातालभुल्लोके यत्र यत्र भवेत्शिवम् ।

तत्र रक्षतु गोरक्षं दत्तात्रेयच पातु माम् ॥२९ ॥

ॐ नमो देवदेवेश ॐ नमो देवाधिनायकम् ।

ॐ नमो गोरक्षनाथाय दत्तात्रेय नमो नमः ॥३० ॥

नमो ऋग्वेदरूपाय नमो यजुस्वरूपिणे ।

नमो गोरक्षनाथाय दत्तात्रेय नमो नमः ॥३१ ॥

नमो सामस्वरूपाय नमोऽथर्वणरूपिणे ।

नमोऽस्तु नवनाथाय नमो षोडश सिद्धये ॥३२ ॥

नमो अनादिदेवाय नमो आदिस्वरूपिणे ।

नमो वेदांस्वरूपाय नमो सिद्धान्तरूपिणे ॥३३ ॥

नमो निर्मलरूपाय नमो चिन्मयव्यापिणे ।

नमो विद्युत्स्वरूपाय नमो ज्योतिस्वरूपिणे ॥३४ ॥

नमो अघोररूपाय नमो निष्कर्मस्वरूपिणे ।

नमो विश्वस्वरूपाय नमो सर्व स्वरूपिणे ॥३५ ॥

नमो अनन्तरूपाय नमो बोधस्वरूपिणे ।

नमो सकलस्वरूपाय नमो वज्रस्वरूपिणे ॥३६ ॥

नमो कल्मषनाशाय नमो पापप्रणाशिने ।

नमो चारुस्वरूपाय नमो दिव्यस्वरूपिणे ॥३७ ॥

नमो दुष्टप्रणाशाय नमो दैत्यान्तकायच ।

नमो अधर्म्मनाशाय नमो धर्म्मस्वरूपिणे ॥३८ ॥

नमो निष्कर्मरूपाय नमः कर्मान्तकायच ।

नमो भस्मांगरागाय नमो दिगंबरायच ॥३९ ॥

नमो सस्मितविक्राय नमो सस्मितलोचने ।

नमो द्वेषविनाशाय नमो क्रोधान्तकायच ॥४० ॥

नमो निःशंकरूपाय नमो वैराग्यरूपिणे ।

नमो मंगलरूपाय नमो कल्याणरूपिणे ॥४१ ॥

ऋद्धिसिद्धिफलंदाताभुक्तिमुक्तिश्चदायकम् ।

नमोऽस्तु दत्तगोरक्षं संसारार्णवतारणम् ॥४२ ॥

इति दत्तस्तवं दिव्यं दत्तगोरक्षकं शुभम् ।

पठंते लभते शैवं वाक्सिद्धिदेहसिद्धिदम् ॥४३ ॥

योगसिद्धि सर्वसिद्धि इष्टसिद्धिलभंतिच ।

दुष्टदानवसंहर्ता निर्भयो जायते नरः ॥४४

नमृत्युर्नजरारोगं निर्भयो जायते नरः ।

तत्रश्वविजयोलाभं यत्र तिष्ठति साधका ॥४५॥

स्वशक्तिसहितादेव नवनाथेषुवोधना ।

सगणशक्तिसहितादेव प्रसन्न संक्रमात् ॥४६॥

ॐ नमो दत्तात्रेयाय नमो नमोऽस्तु विष्णुस्वरूपाय नमो नमोऽस्तु ।

ॐ नमो गोरक्षनाथाय नमो नमस्ते शिवस्वरूपाय नमो नमस्ते ॥४७॥

इति श्रीरुद्रयामले श्रीईश्वरपार्वतिसंवादे

दत्तगोरक्षनाथकवचस्तवराजंसंपूर्णं ॥शुभमस्तु॥श्रीरस्तु॥